श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीपरमार्थस्तुतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीपरमार्थस्तुतिः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्गृध्र सरस्तीर पारिजात मुपास्महे।
यत्र तुङ्गैरतुङ्गैश्च प्रणतैर्गृह्यते फलम्॥ १ ॥

गुरुभि स्त्वदनन्य सर्व भावैः गुण सिन्धौ कृत संप्लवस्त्वदीये।
रणपुङ्गव वन्दि भावमिच्छन् अहमस्म्येक मनुग्रहास्पदं ते॥ २ ॥

भुवनाश्रय भूषणास्त्र वर्गं मनसि त्वन्मयतां ममातनोतु।
वपुराहव पुङ्गव त्वदीयं महिषीणा मनिमेष दर्शनीयम्॥ ३ ॥

अभिरक्षितुमग्रतः स्थितं त्वां प्रणवे पार्थ रथे च भावयन्तः।
अहित प्रशमैरयत्न लभ्यैः कथयन्त्याहव पुङ्गवं गुणज्ञाः॥ ४ ॥

कमला निरपाय धर्मपत्नी करुणाद्याः स्वयमृत्विजो गुणास्ते।
अवनं श्रयतामहीनमाद्यं स च धर्मस्त्वदनन्य सेवनीयः॥ ५ ॥

कृपणाः सुधियः कृपा सहायं शरणं त्वां रण पुङ्गव प्रपन्नाः।
अपवर्ग नयादनन्य भावाः वरिवस्या रसमेक माद्रियन्ते॥ ६ ॥

अवधीर्य चतुर्विधं पुमर्थं भवदर्थे विनियुक्त जीवितः सन्।
लभते भवतः फलानि जन्तुः निखिलान्यत्र निदर्शनं जटायुः॥ ७ ॥

शरणागत रक्षण व्रती मां न विहातुं रण पुङ्गवार्हसि त्वम्।
विदितं भुवने विभीषणो वा यदि वा रावण इत्युदीरितं ते॥ ८ ॥

भुजगेन्द्र गरुत्मदादि लभ्यैः त्वदनुज्ञानुभव प्रवाह भेदैः।
स्व पदे रण पुङ्गव स्वयं मे परिचर्या विभवैः परिष्क्रियेथाः॥ ९ ॥

विमलाशय वेङ्कटेश जन्मा रमणीया रणपुङ्गव प्रसादात्।
अनसूयुभिरादरेण भाव्या परमार्थ स्तुतिरन्वहं प्रपन्नैः॥ १० ॥

॥ इति श्रीपरमार्थस्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥